A.C. Joshi Library
P.U. Chandigarh

MSS No. 404 Subject —

Name of MSS चंद्रोन्मीलन

Author —

Period — Folios 60

Script Devnagiri Source Prithipal Singh, Jalandhar

Missing Folios —

४०७

Sans. MS.
851?

C216

404-MS

चन्द्रोतमलिन
३० पत्रक ॥ ल० अ० १२ पं० प्र० श्लो०

ह० ला०

६० स्वस्ति श्रीगणेशाय नमः॥ हेरंबं च नमस्कृत्य विश्वरूपं त्रिलोचनं प्रश्नावि शुं नयाशक्रं विश्वरूपा सरस्वती सुरसंस्था
गणाः सर्वे अनिलः सूर्यचंद्रमाः पृथ्व्यादि पंचतत्त्वानि सुरान्महिषमर्दिनी २ सप्ताईपीठदेवस्तु चतुःषष्टि च योगिनी
नमस्कृत्य मया सर्वं दर्शनाद्गुरुवंदितां ३ यामलं ब्रह्मरुद्रस्य विश्नोर्यामलमेव च उमायायामलं ज्ञानं पंचमं युद्धजा
र्णवं ४ आदिचूडामणेः सारं स्वयं जैनेंद्रभाषितं यच्च दृष्टं मया ज्ञानं ग्रंथभेदमनेकधा ५ सारात्सारतरं सारं क्षीरस्य पि
यथास्थितं समुद्रस्य यथा रत्नं पुष्पमध्ये मधुर्यथा ६ पाषाणान्तिः सतासर्वे हिरण्यादि यथा कृतं तथा हि सर्वशास्त्रा
णां सारभूतं मयोद्धृतं ७ दृष्ट्वा चक्राण्यनेकानि कोटिभेदशतानि च तेन दृष्टेन मार्गेण रचितं चंद्रोन्मीलनं ८ अतीताना
गतं चैव वर्त्तमानं शुभाशुभं लाभो हानिर्जयं युद्धे अल्पमृत्युर्द्ध्वनागमं ९ मनोमध्ये तु या चिंता मुष्टिभेदमनेकधा न
ष्टं द्रव्यशल्यं च ग्रामनाम च तस्करं १० दिशाभागं यथा ज्ञेयं संख्यावादिनमेव च गमनागमनं चैव याहृश कर्म्ममेव
हि ११ आतुरे व्याधिरूपं च गर्भं च प्रसवाः स्त्रियः मैथुनं तु यथा रात्रौ वास्वाद्भोजने यथा १२ छत्रभंगं नरेंद्राणां राष्ट्रभं
गस्य लक्षणम् कोटभंग चतुर्भितं प्रावृषे जलदागमं १३ वापीकूपजलोद्देशं उद्यानं मठमंदिरं त्रिशतं षष्टिसंयु
क्तं अर्घकांडस्य निश्चयं १४ गजादिसर्वजीवेषु वाणिज्यं क्रयविक्रयं परोक्षमंत्रभूपालानां पत्रलेखं च मुद्रितं १५ युद्ध
रधीरमतेयत्र जीवमृत्युमपेक्षया नपस्यसंधियुद्धं तु उद्वाहं नष्टजातकं १६ भूमिभावं तु तातवं सफले निः फ:

मैत्रीभावं पृथा राजा स्त्रीपुंसं च विशेषतः ७ अन्यजन्मास्थितायोनि स्वर्गपातालमेव च मर्त्तोपि गच्छते पश्चमोदे
स्वर्गनरकयोः १८ अन्यच्च त्रिषुलोकेषु वर्त्तते सुरदानवे उध्दतं तु मयाज्ञानं ज्ञातव्यं तु चराचरं १९ इति श्रीचंद्रोन्मी
लने महाशास्त्राण्णिवाह्निनिर्गते मूलतंत्रार्थसंबंधः प्रथमं प्रकरणं १ अथातः संप्रवक्ष्यामि वर्गवर्णय यथाविधि
एकैकस्य यथा भेदं कथयामि न संशयः १ उत्तरं अधरं चैव उत्तराधरोत्तराधरं स्वराणानुमितं चैव वर्गाणां च तथैव च
संयुक्तं प्रथमं पक्षं असंयुक्तं द्वितीयकं अभिहितं तु तृतीयं स्याद् अनभिहितं चतुर्थकं २ पंचमं त्वभिघातं च षष्ठमालि
गितं तथा धूमितं सप्तमं ज्ञेयं दग्धं चैवानु चाष्टमं ४ जीवं च धातु मूलं च स्त्रीपुंसं च नपुंसकं मृतको व्याधियस्त
स्थ जीवतात्व सुखावह ५ वर्णमानं तथा योनिं विपरीतं धं तु कुब्जकं वधिरा वाक्यहीना च षल्वाट वक्रकेशकाः ६
वेधहीना तथा छिद्रा कोमला चातिनिष्ठुरा सुगंधा उग्रगंधा च अबाह्य बाह्यमेव च ७ स्वदेशानि विदेशानि उ
ष्ण सलिल शीतलं स्वर्गं मर्त्यं च पातालं देवाल्पदनारकाः ८ संवत्सरमासपक्षतिथिनक्षत्रमेव च वारप्रहरं तु
विज्ञेयं अधरादिविभागयोः ९ इति भेदेन ज्ञातव्यं स्वरवर्गं तु अक्षरं ॥ इति चंद्रोन्मीलने महाशास्त्राण्णिवाह्नि नि
र्गते नामाक्षरोदाहरणं द्वितीयः २ प्रथमस्य त्रितीयस्य उत्तराहरसंस्थितः अधरं द्वि चतुर्थं तु पंचमो अपपक्षकं

1A

3 तस्यमध्येतु ये विषमा उत्तरोत्तरसंस्थिताः अधरस्य इदं भेदं अधराधरजायते २ स्वराश्चद्वादशाप्रोक्ता एकांतरस्व
रोत्तराः तस्यमध्येस्थितास्त्रीणिज्ञातव्या उत्तरोत्तराः ३ उत्तरस्यतु पञ्चैषं अधरास्तु प्रकीर्त्तिताः वर्गसंख्याभवेच्चाष्टौ
विषमं उत्तरं शुभं ४ उत्तरोत्तरज्ञातव्यं वर्गप्रथमपंचमं चतुर्थमधरावर्गद्वयोर्वर्गाधराधरो ५ वर्णमात्रास्तथावर्गा
द्वादशाभेदंतु लक्षयेत् अन्यं तु संप्रवक्ष्यामि पंचवर्गनवाक्षरं ६ येन विज्ञातमात्रेण त्रैलोक्यं पश्यति स्फुटं अ ए क च ट
त प य श १ आ ऐ ख छ ठ थ फ र ष २ इ ओ ग ज ड द ब ल स ३ ई औ घ झ ढ ध भ व ह ४ उ ऊ ङ ञ ण न म अं अः ५ प्र
थमवर्गतलो यस्य संयुक्तं पतनेक्व हि चतुर्थसमं युक्तं क्रमोभिहितं निर्दिशेत् ७ पूर्वोत्तरस्य दावर्गज्ञातव्या नाभि
हितंपरं पंचमाद्यद्दश्यते तदाघातं न संशयः ८ ह्रस्वमात्रा चतुष्कं तु पस्य वर्णस्य दृश्यते आलिंगितं विजानीयाद्दी
र्घाभिधूमितमेवच ९ पंचमो अथ षष्ठं तु अंत्योच्चैव स्वरद्वयं आरूढाद्दृश्यते यत्र तत्र दग्धा न संशयः १० क
वर्गादिचतुष्कं तु यशहाजीवसंज्ञकाः तथा स्वचवसाधातुमूलं शेषं विनिर्दिशेत् ११ प्रथमादित्रयं नात्रा सप्तमं नवमा
न्तिकं एते जीवस्वरा तेषा अष्टौ रे सहसंयुताः उ ऊ अं चत्रयो मात्रा धातुवर्णानुनिश्चिताः अन्ये तु पेस्वराकेचिन्मूला
लोपरिकीर्त्तिता १२ उ ऊ अं च क ख ग घ च छ ज झ ट ठ ड ढ य मा हा अ आ इ ए ओ अः एते जीवस्वरा एकविंशति उ ऊ

वं॰ ७॰ २

२ ४

अंतथदधपफबभवसधा त्वक्षरात्रयोदश ईईऊॠऌ एऐओऔ अं अः लाक्षरा एकादश ह्रस्व मात्रा भवेत्सूक्ष्मो दीर्घ चैवास्त्रियस्तथा १४ दग्धेन पुंसकं ज्ञेयं त्रयो भेदा उदाहृताः वक्राक्षरा व्याधिग्रस्ता मृता चैवाशिकाक्षरा जीवंतो विषमाज्ञेया संयुक्ताच ह्रस्वावहाः अवर्गं तु भवे श्वेतं रक्तं चैव कवर्गकं चवर्गं पीतवर्णं तु हरितं तु टवर्गकं तवर्गकं सवर्णं तु पवर्गं धूम्र उच्यते १७ यवर्गं हरितं ज्ञेयं पुनः कृष्णं शवर्गकं अश्वा श्वेतं गस्थितं रूपं ईई पीतं न संशयः १८ उऊ धूम्रवर्णं तु एऐ रक्तं न संशयः कर्बुरं तु भवेत् ओऔ कृष्णमेकादशस्वर १९ अंतिमं च पुनः श्वेतं एते च द्वादश स्वराः अवर्गं वर्तुलं ज्ञेयं दीर्घं चैव कवर्गकं २० चवर्गं तु त्रिकोणं च खंडं चैव टवर्गकं वक्राक्षरं तवर्गं तु नागरूपं पवर्गकं २१ यवर्गं तु चतुःकोणं बहुकोणं शवर्गकं वर्तुलं च दीर्घं अस्य चतुःचक्र खंडकं २२ हयोर्द्वयोः स्थिता मात्राः षड्विस्थाना निलक्षयेत् अकवर्गं भवेत् दंड जरायुश्च टवर्गयोः २३ तपवर्गास्थितं स्वेद उद्भिज्जं यशमेव च त्रिभिस्त्रिभिः स्वरैर्ज्ञेया अंडजास्तु जरायुजा २४ स्वेदजा उद्भिजानां च स्वराश्चैव प्रकीर्तिताः देवं अकारवर्गं तु दैत्यं चैव कवर्गकं २५ चवर्गं नागविज्ञेयं गांधर्वं तु टवर्गकं मुनिसंज्ञं तवर्गं तु पवर्गं राक्षसं स्मृतं २६ यवर्गं तु पिशाचानां मानुषं च शवर्गकं चिपिटा चाक्षरा ज्ञेया अष्ट वर्ग चतुर्थकाः

2A

5 २ अधिकातत्र ज्ञातव्या वर्गांतापंचमाक्षरा: यस्य वर्णस्य दृश्यंते अधस्याने द्वयोस्वरा: २८ उऊ अं अ: ओऔ द्व
अउते कुब्जकाक्षरा: वधिरा संप्रवक्ष्यामि एऐ शाय स्वाहास्थिता: २९ वर्गांतु अप्रहीनात्तु हि: स्वरा चतुक्षरा: उऽ
यफभठश्चैव ज्ञातव्यातु विशेषत: ३० प्रथमास्वरा द्वेच कामच गघसंयुता चत्वारा तेच ज्ञातव्या अक्षरा स्वरभेदत:
३१ ऋकेशाक्षरा येच ख उठ ण घवस्तथा सामान्यं द्वादशी मात्रा स्वरवर्णं च लक्षयेत् ३२ षष्टम: वर्ग चैवंतु
मात्रा चैव चतुर्थकं पफबभ इति ज्ञेया क्लिष्टास्त्यपरिकीर्तिता ३३ उऊ नदडपरहनि वैधा अक्षराष्टकं अप्र:
कषाय सविज्ञेया कोमला कुसुमोपमा ३४ उऊ तकुदश्चैव निषुरा वज्रसंभवा: उत्रयश्च सुगंधा च दुर्गंधा
चाधराधरा ३५ उत्तरस्वरसंख्याद्यं अपरवाद्यं अधरस्वरं संयुक्तस्य स्वदेशाच अ संयुक्तं द्वितीयकं ३६ भिद्दि
तंतु भवेग्रामं अनभिहितं ग्रामवाच्यकं अकृच्छशा शीतला ज्ञेया चत्वार: स्वरसंयुता: ३७ चटवर्गे स्थितोऽग्र
ग्रे एऐ ओऔ स्थिता: स्वरा उसंतृतपे वर्गे तु पंचमं षष्ठमं स्वरं ३८ शेषामंत्याक्षरा लोकस्यात्रि धामात्रासमन्विता य
स्य यस्य तु वर्णस्य मात्रा यस्य त्व भेदिता ३९ तस्य तस्य भवेत्यक्ष: मात्राकार्य विकारणात् अकवर्गे भवे द्देवा चटव
र्गे तु मानुषा: ४० तपवर्गे भवेत्सदा नानारका यशा वर्गयो: अधराधरे भवे द्वर्षं अधरा मास उच्यते ४१ उत्तरस्य
मेव सदा दिनास्था उत्तरोत्तरे: उत्तरा शुक्लपक्षं तु अधरा कृष्णपक्षकं ४२ उत्तरास्तु दिनं प्रोक्तं अधरा निशि मेव च

3

चं॰ उ॰ ६
२

प्रतिपदादितिथिं ज्ञात्वा ककारादि यथा विधिः ४३ उत्तरास्याधरान्तेया पक्षौ वापि सिता सितौ ङ॰ अणनमाऽम
मावास्यापूर्णमास्या यथाक्रमं ४४ ककारादि हकारांतं दीनांगाः पंचवर्गयेत हृष्यमालास्थितो नित्यं कृत्तिका
दि यमांतिकं ४५ संयुक्तं प्रथमं प्रहरं असंयुक्तं द्वितीयकं अभिहतं तु त्रितीयं तु अनाभिहितं चतुर्थकं ४६ अभि
घातं च यो दृष्ट्वा संधानि भौतिकं वदेत सप्तवर्गास्थिता वारं अर्कादिषु यथाक्रमं ४७ अवर्गं पूर्वभागे तु आ
ग्नेयां चकवर्गकं चवर्गं दक्षिणे ज्ञेयं नैरृत्यां चटवर्गकं ४८ तवर्गं पश्चिमे भागे वायव्यां तु सवर्गं पवर्गं उ
त्तरे भागे ई शान्यां तु शवर्गकं ४९ इति चंद्रोन्मीलने महाशास्त्रागे वाहे निर्गते स्वरादस्रनयनं तृतीयं पटलं २
अथातः संप्रवक्ष्यामि प्रश्नं गत्यानुलक्षणं शुभे दिने तु नक्षत्रे शाकुनोत्साह संयुते शुचिर्भूत्वा ततो मंत्री लो
भमात्सर्यवर्जितः अनन्तानि ततो गत्वा तांबूलं करसंस्थितं २ प्रातमष्टोत्तरसायं १०८ प्रभाते वजुफेस्मनं
ॐ नमो पद्मासने शब्दरूपे ऐं ह्रीं क्लीं वदवद वाग्वादिनि स्वाहा नमः तेन सिद्ध्यंति तत्क्षाकं प्रश्न प्रसोत्तरस्थ
मं ३ अनार्ते प्रश्न गृह्णीयात प्रथमं वाक्यं सदा ग्रहेत एकभावमधो दृष्टिं अवर्णां करसंस्थितौ ४ नंद्याल
एणं दंधकु ब्राह्मणं इंदुकुष्ठिनः कर्दितं र समसंयुक्तं हस्तादर्धं तु शारद्यो ५ एजे हूं अः एते नैव तु गृह्णीया
सभाप्रश्नं न कारयेत वृद्धि अंशं प्रजापे तु ज्ञानं नैव स्फुटं भवेत ६ एतेर्दोषैर्वि निर्मुक्तो पष्टिकां भूमिसं

२

3A

7 लिखेत् प्रथमं दृष्टि भेदेन ज्ञायते च मनगस्थितं ७ इति चंद्रोन्मीलने महाशास्त्रे एवादि निर्गते प्रस्तावतारं चतुर्थं ४ अथातः संप्रवक्ष्यामि प्रश्नं संयुक्त लक्षणं अकारादि चतुष्कं च वर्णानुक्रम संख्यया १ अस्संयुक्ता द्विगुणास्त्वधराधराचतुर्गुणाः वर्गवर्णभवेत्संख्या सर्वमात्रासमन्विता: २ स्वांशपक्षे यदा प्रश्न वर्गसंख्या हतानि च अभिहतांश्च विज्ञाय पंचवर्गानुलक्षयेत् ३ पंचवर्गस्वराणां तु वर्णराशिहतानि च अभिघाताक्षराणां च सर्वसंख्यासमन्विताः ४ प्रश्नमात्राहतांश्चैव ज्ञातव्यातु प्रयत्नतः ह्रस्वमात्राय दा प्रश्नवर्णानुक्रमसंख्यया ६ द्विगुणा च भवेन्मात्रा अष्टचक्रं विनिर्दिशेत् दग्धप्रश्नं यदा दृष्टा अष्टवर्गाय याक्रमं ७ एकैकृत्वा तदा सर्वे अभावप्रकीर्तिताः इति चंद्रोन्मीलने महा० अष्टादिप्रसमधार पंचमः ५
अतः परं प्रवक्ष्यामि अतीतस्य तु लक्षणं येन विज्ञानमात्रेण महदाश्चर्यकारकं १ दग्धप्रश्न भवेत्तीतं वर्तमानस्य लिंगितं यदा धूमप्रतिष्टं च आगतं च विनिर्दिशेत् २ शुभे द्विप्रं यदा प्रश्ने तदा रूपं प्रदापयेत् अशुभस्य तदा हीनं त्रिभिर्भागं समाहरेत् ३ एकदृष्टे भवेतीतं वर्तमाने द्वितीयके यदा शून्यं प्रदिष्टं तु भविष्यं नात्र संशयः ४ लब्धांकं तु विज्ञेयं प्रश्नवर्गहतानि च पूर्वभागास्थितो नित्यं शेषं चैव विकल्पयेत् ५ उत्तरस्य भवे द्विपदं

अधरस्य चतुःपदं पंचमात्रं यदा दृष्टा धातुयोनिं विनिर्दिशेत् ६ एकदृष्टे भवे द्विपदं द्वाभ्यां चैव चतुःपदं अन्यं
चंद्र अमित्याहु मात्रा चैव विकल्पयेत् ७ येन येन द्विभावेन कल्पयेत् कीर्त्तिविस्तरं अदता अस्य स्वरा चिह्नं पश्चान्ना
ममुदाहरेत् ८ इति चंद्रोन्मीलने अतीतप्रकरणं षष्ठं ६ वर्त्तमानस्य संदिष्टं अ १ च २ त प या १ शुभादरा: क २
ट ४ प ६ श ा ८ यदा दृष्टा वर्त्तमाने अशोभना: १ वर्णराशि ज्ञातवर्गा मात्रा वर्गानुसंयुता कराभ्यां माहरेद्भा
गं वर्त्तमाने शुभाशुभं २ भावार्थं प्रकृते यस्तु राज्यं चैवोत्तरोत्तरे: उत्तराच शुभा ज्ञेया अधरा हानिकारका:
३ अधराधरे भवे व्याधिर्मृत्युदा द्वारपंचमा: दिना द्वारयदा प्रश्ने दिनमध्ये युदा भवेत् ४ अष्टभावाकृता
प्रस्तायेष्वादि प्रसमुद्भूता: इंद्रियैस्तु हरेद्भागं शेषं चैव फलं वदेत् ५ एकदृष्टे भवेद्राज्यं क्षयं चैव तु शोभनं
हानिस्यात्रिषु दृष्टेषु व्याधिर्मृत्युश्च पंचके ६ विषमाश्च यदा दृष्टो अक्षराणि स्वराणि च तदा तत्र शुभं ज्ञेयं
शेषं चैव अशोभनं ७ वर्णराशिकृता प्रस्ता मात्रानुक्रमसंयुता पूर्वोक्तस्य हरेद्भागं ज्ञातव्यं सुखदुःख
यो: ८ इति चंद्रोन्मीलने महा॰ वर्त्तमानागतं प्रकरणं सप्तमं ७ उत्तरस्य स्वरे लाभं अधरे हानिमेव च अ
क्षराणि मिदं भेदं अष्टभावं निरीक्षयेत् १ दग्धं चैव यदा प्रश्ने धाहीनो गमिष्यता: लाभस्यार्थं भवेद्धा

४A

१ निर्दिष्टमृत्युर्नसंशयः २ स्वरदीर्घं यदा दृष्टं आदिमेभागं लक्षयेत् तदा युद्धे जयं ज्ञेयं शेषस्थैव पराजयं ३ प्रश्नं तु स्मात्तु वैर्ग स्य सर्वमात्रा समन्विता भागंचैव पुनर्दद्यात् जयं चैव पराजयं ४ मृत्युश्च लक्षणं आयुः कथयामि विशेषतः मृत्युः पंचविधा प्रोक्ता जीवनं च चतुर्विधं ५ अल्पमृत्युर्विदेशं च युद्धव्याधिजराधिजं सुखं च व्याधियुक्तं च सधनो निधनमेव च ६ अभिहतोल्पमृत्युश्च अप्रसंयुक्त विशेषकं अभिघातान्मृतो युद्धे अधरे व्याधिपीडितं ७ अन्तरस्य यदा प्रश्नं स्वरं चैवान्तरोत्तरं दीर्घकाले भवेन्मृत्युर्जराया अप्रकीर्तिताः ८ वर्गसंख्याकृता प्रश्न वर्ग मात्रा समन्विता षड्भिस्तु हता राशिर्हि गुणं अरसंहता ९ एकदृष्टे जरा मृत्युर्व्याधिमृत्युर्द्वितीयके तृतीये शस्त्रघातं च विदेशं च चतुर्थके १० भागशेषं यदा शून्यं अल्पमृत्युर्विनिर्दिशेत् अष्टभावानु विज्ञेया त्रिभिः प्रश्नानु लक्षयेत् ११ लब्धांकं तु हता वह्नि विभक्तं ग्रहसंख्यया शेषं च तिष्ठते किंचित् सकथ्यं च न संशयः १२ प्रश्नं स्मात्तु वैर्गस्य मात्रां चैव हतानि च भागंचैव पुनर्दद्यात् जयं चैव पराजयं १३ मृत्यु राशिकृता हि स्थिरं धृत लब्धा निपातयेत् शतसंख्या हतं शेषं आयुसंख्या विनिर्दिशेत् १४ आयुः संवत्सरा येच प्रश्नमात्रा हतानि च द्वादशे स्तु हरेद्भागं शेषं मासस्तु उच्यते १५ मासराशि हता वर्गा त्रिंशद्भागं यदा

5

चं॰उ॰ ५ 10

पयेत् शेषाश्च तिथिर्विज्ञेयावर्णानुष्याणि कल्पयेत् १६ उत्तरोत्तरस्य दाप्रश्ने सौख्यं चैव निरंतरं अधरोत्तरस
न्मिश्रं व्याधिग्रस्तं प्रजायते १७ वर्गावर्गाः स्थितावर्णा मात्रानुक्रमसंयुता तत्र भागं प्रदातव्यं ज्ञातव्यं सुखदुःख
योः १८ नवाक्षरा त्रिवर्गाश्च धनाढ्या सहिरण्यकाः चतुर्थानिर्धना ज्ञेया पंचवर्गानुलक्षयेत् १९ त्रिगुणा
श्चास्थितावर्गावर्णानुक्रमसंख्यया हरितश्च पुनर्भागं धनाढ्यं निर्धनं स्मृतं २० इति चंद्रोन्मीलने महाशा
स्त्रार्णवाद्विनिर्गते लाभालाभजीवितमरणजयपराजयधनागमनिर्धनज्ञाने अष्टमोध्यायः ८ अथातः
संप्रवक्ष्यामि जीवं धातुश्च मूलकं एकैकस्य यदा भेदं कथयामि परिस्फुटम् १ सर्वज्ञाना स्थितं सारं देवानाम
पि दुर्लभम् ज्ञायते येन त्रैलोक्यं आब्रह्मभुवनांतकं २ जीवाक्षरा भवेज्जीवं धातुं धातुर्विनिर्दिशेत् मूलस्य
मूलकं ज्ञेयं ज्ञानं त्रिविधलक्षणं ३ आदौ प्रश्ने स्थितावर्णा जीवमात्रा समन्विताः तदा जीवं विनिर्दिष्टं धा
तुमूलस्य लक्षणं ४ आलिंगिते स्थिते जीव धातुर्दग्धानुउच्यते दीर्घस्वरा यदा दृष्टा तदा मूलं न संशयः ५ आ
लिंगिता ह्ययोर्वर्णा एकवर्णानुधूमितं तदा जीवं विनिर्दिष्टं नात्र कार्या विचारणा ६ दग्धप्रश्ने यदा सर्वे एक
वर्णा लघुस्वरा धातुयोनि समालोच्य प्रांतिहीनं तु लक्षयेत् ७ दीर्घमात्रा स्थिताः सर्वे एकदग्ध प्रदृश्यते
मूलयोनिः समाविज्ञेया त्रिभिर्भेदमुदाहृतं ८ जीववर्णा स्वराश्चैव मूलं धातुर्विनिर्दिशेत् धात्वक्षरा भवेन्मू

५

5A

॥ लंमूलंजीवमजायते ९ मुष्टिभेदंयदाचैवजीववर्णस्यमूलकं मूलाद्वरमेवद्धांतुधातुंजीवंविनिर्दिशेत् १०
त्रयमूलाकृतिंतत्रजीवधातुविनिर्दिशेत् प्रश्नाद्वरहताचाष्टैःस्वरयुक्तानिमेवच ११ तत्रभागक्रमेणघातेयो
घयोनिविनिर्दिशेत् प्रश्नवर्गाहतावर्णा वर्णाश्चैवहतास्वराः १२ स्वराणामिदंभेदंभागदघातुपूर्वकं उत्तर
स्यास्थितारारशौमध्ये धराणिपातयेत् १३ शेषंतुतिष्ठतेकिंचित् एकंदग्धधरेततः ईदृशंचक्रमंज्ञेयंमात्रा
सर्वाणिकारयेत् १४ हरितंचत्रिभिर्भागंस्फुटंयोनिविनिर्दिशेत् स्वराणांचैवसर्वेषांवर्णसंख्याहतानिच
१५ वर्णसंख्याहतामात्राभागंयोनिस्तुउच्यते त्रिगुणावर्णसंख्याचमात्रापिंडंतुसंयुतं १६ सर्वैकस्तुहरेद्भा
गंयोनिःशेषंविनिर्दिशेत् द्विगुणंचस्थितावर्णामात्राचैवचतुर्गुणा १७ मिश्रितंतुत्रयोभागंयोनिसंख्या
विधीयते तिथिहताचवारेणवर्णसंख्याहतंपुनः १८ घटिकाचधनेमात्रा एकैकस्तुखाहरेत्पुनः कुलाप्रश्ना
क्षराः सर्वे उत्तराणधराणिच १९ तयोर्मध्येतुयोहीनास्तानिसर्वाणिपातयेत् शेषमध्येस्तितिथिर्ज्ञाज्याग्रमावा
स्यातुप्रतिकं २० पातनीयाहिशेषेणयातिथिःपृष्टितोगता एकंद्घादिमंध्याकं पातनीयोधरान्तरेः २१ त्रिभि
र्भागेनयच्छेषंसाचयोनिःस्फुटाभवेत् एकदष्टेभवेज्जीवंद्वयंधातुनसंशयः २२ शून्येमूलंविजानीयाच्चिंता

6

वं॰उ॰ 12
६

चैवानुलक्षयेत् अथ मूलक्षा कृतातत्र तदा धातु विनिर्दिशेत् २३ द्वितीयेन भवेन्मूलं शून्ये जीवं तु उच्यते य
दा तुष्टिः प्रवंधाच प्रथमे मूलं विनिर्दिशेत् २४ द्वितीयेन भवेज्जीवं धातुः शून्येन संशयः अक्षराणां यदा दि
प्रं जीवं सर्वत्र दृश्यते २५ एकस्थाने यदा धातु जीवं धातु वदेत्ततः अथवा मूलमेकं तु जीवं सर्वत्र दृश्यते २६
दृष्टशं यदा भेद मूलं जीव समन्वितं वहुभेदैः स्थिता धातु एकभेदेन मूलकं २७ मूललग्नास्थिता धातु त्रिभि
र्दृष्टा त्रयास्थितं दृश्यंते त्रयो योनिः जीव धातु स मूलकं २८ अधिकं चैव यद्दृष्टं सा च योनि प्रकीर्त्तिता इति
चड्डोन्मीलने जीव धातु मूल प्रकरणं ७ जीव दृष्टे चतुर्भेदं द्विपदस्य चतुष्पदं अपदस्य तृतीयं पाद संकु
लमेव च । प्रथमस्य भवेद्द्विपदं द्वितीये तु चतुष्पदं तृतीये अपदं ज्ञेयं चतुर्थे पादसंकुलं २ स्वांशपदे तु संयु
क्ते द्विपदं च भविष्यति असंयुक्ते चतुष्पादं पादहीनाभिघातिते ३ अभिहते च संदृष्टे पादसंकुलमेव च पंच
वर्गानुभेदेन ज्ञातव्यं पादनिर्णयं ४ ह्रस्वमात्रास्थितं द्विपदं दीर्घमात्रा चतुष्पदं अपदं तु भवेत् अंग प्रति
मं पादसंकुलं ५ प्रस्व वर्णानु संगृह्य एकद्व्याहुरं तिच कृत भागेन संहाय शेषं पादं विनिर्दिशेत् ६
एकेन भवेद्द्विपदं द्वाभ्यां चैव चतुष्पदं त्रिभिस्तु अपदं ज्ञेयं चतुर्भिः पादसंकुलं ७ स्वराणां च त्रयं दृष्ट्वा भागं

६

13 गस्तानुमिश्रितः हरितंचपुनर्भागं शेषंपादस्यलक्षणं ८ पक्षमात्रातुयोवर्णे तेनतस्यनिहंतिच एकत्रानु
कृतोराशिभागंदद्यात्तुलक्षयेत् ९ प्रस्नवर्णस्वराश्चैववर्णएकयुक्तंतुकारयेत् द्वितीयस्यततोहीनाभक्तंपादानुउच्यते
१० देवान्तरैर्भवेद्देवोनरश्चमानुषान्तरैः पक्षिणांपादिरोणेज्ञेयानारकाः नरकैः स्मृताः ११ उत्तरोत्तरैर्भवेद्देवोमा
नुषोउत्तरान्तरैः अधराधरैर्भवेत्पक्षीअधरैर्नारकोस्मृतः १२ त्रिसप्ततस्यानवमेस्वरादेवंहिलक्षयेत् त्रिप्रथ
मास्त्वद्वेयामात्राअंतेचैवनरंभवेत् १३ दशमाश्चचतुर्थंतुपक्षिणांचविशेषतः दग्धा च योमात्रोनार
काःपरिकीर्त्तिताः १४ द्विगुणंचभवेन्मात्राप्रस्नवर्गहतानिच चतुर्भिस्तुहरेद्भागंद्विपदयोनिनिश्चितं १५ एकद
शेभवेद्देवंद्वितीयेनरमेवच तृतीयेनभवेत्पक्षीचतुर्थेनारकस्मृतः १६ प्रश्नंसंस्त्वन्यान्तरैर्यःसप्रयुक्तेर्नवे
हृतात् युगसंख्याहरेद्भागंशेषंचैवफलंभवेत् १७ वर्गसंख्याहतावर्णासर्वमात्रानुसंयुता हरितंतुपुनर्भागंशा
तव्यंतुयथाक्रमं १८ देवाश्चतुर्विधाप्रोक्ताभुवनेश्वंतरास्थिताः कल्पवासीततोनित्यंवानव्यंतरमेवच १९ उत्त
रोत्तरापदाप्रस्नतदावन दृश्यते उत्तरेचान्तराज्ञेयाकल्पवासीधराधरैः २० अधराश्चयदादृष्टावानव्यंतरमे
वच एवंतुकल्पयेद्योनिपश्चात्तिप्रमृताहरेत् २१ एकविंशहतावर्णामात्राश्चप्तहतानिच क्रमेभागंपुनर्दद्यात्
ज्ञातव्यंदेववासिनः २२ एकेनभवनेचैवद्वयोवांतरवासिनः तृतीयेकल्पवासाचशून्येचैवानव्यंतरा २३ प्रस्नव

चं॰ उ॰ 7
७ 14

र्गोहता त्रीणि द्विगुणा वर्गा संयुता मात्रा चैव युताः सर्वे शेषं चैवा विनिर्दिशेत् २४ वर्गा चैव हता वर्णा वर्णाश्चैव हतास्त्व
राः सप्तभागं क्रमेद्याद्दृश्यन्ते देववासिनः २५ चतुर्दशा हता वर्णा वर्णा चैव स्वरं तथा तत्र भागं क्रमं दद्यात् ज्ञातव्यं प्र
र्वं वर्धया २६ मूल वर्गैर्हता वर्णास्तत्र सप्तानिपातयेत् मात्रा च त्रिगुणी योज्या भागं दद्याद्यथाक्रमं २७ स्वर्गाद्ये
रैः स्थिता स्वर्गे मर्त्ये मर्त्ये प्रजायते पातालं तु पुनर्भेदं त्रिभिर्भेदमुदाहृतं २८ ऊर्ध्वमात्रा स्थिता स्वर्गे मध्ये मर्त्ये
व्यवस्थिताः यदा मात्रा अधो दृष्टा पातालं चाविनिर्दिशेत २९ अक्षराश्च स्वराः सर्वे त्रिगुणा च कृतानि च मूल
वर्गा हता राशौ त्रिभिर्भागं समाहरेत ३० प्रथमे तु भवे स्वर्गं द्वितीये मर्त्यमेव च पातालं तु तृतीये तु त्रिधा देवाः प्र
कीर्तिताः ३१ इति देवानां भेदः मानुषास्थिता पंच ब्राह्मणा क्षत्रियास्तथा वैश्याश्चैव तथा शूद्रा अंतजाः प
चमास्मृताः ३२ ब्राह्मणः प्रथमे वर्गे द्वितीये क्षत्रियस्तथा तृतीये वैश्य विज्ञेया चतुर्थे शूद्र एव च ३३ हीनांगा दृ
श्यते वर्णा बहुधा तथैव च अंतजातिस्तु विज्ञेया प्रसमधो तु लक्षयेत् ३४ अथ स्वर विभेदात्तु अ उ ए ओ तु ब्रा
ह्मणः आ ऊ ऐ क्षत्रियास्तथा ३५ ओ वैश्या स्तुमिता ऋ उ ऊ शूद्रास्तथैव च अं अः अंत्यजाश्चैव स्वरभेदमु
दाहृतं ३६ प्रश्नवर्णैर्हतास्सप्त मात्रा चक्रमसंयुता पूर्वसंख्या हरेद्भागं शेषा जाति क्रमेण च ३७ द्विगुणा वर्णसंख्या
तु मात्रा च त्रिगुणास्मृताः संयुक्तात्तु हरेद्भागं ज्ञातव्यं तु विशेषतः ३८ ब्राह्मणमेक दृष्टेन क्षत्रियं तु द्वितीयके ॥

7A

15 त्रिभिर्दृष्टे भवेद्देश्यं चतुर्थे सूक्ष्ममेव च ३९ शून्ये च अंशजा ज्ञेया ज्ञातव्यं नात्र संशयः अष्टादशाहता वर्णा मात्रा वर्गे
हतानि च ४० एकत्रानुकृता सर्वे भागं दद्यात् यथाक्रमं ककारादि हकारान्तं अंत्यजा पंच संयुता ४१ वर्णराशिहृ
तावर्गे मात्रा सर्वानुसंयुता पंचभिस्तु हरेद्भागं वर्णसंख्या विनिर्दिशेत् ४२ एकदृष्टे भवेद्बालं द्वितीये च कुमारिकं
तृतीये तु भवेत्प्रौढा अतीद्वृद्धमेव च ४३ प्रष्टाभिहता प्रश्नयोः यथायेन युज्यते पंचभिस्तु हरेद्भागं ज्ञातव्यं
तु विशेषतः ४४ त्रिविधं तु तदा भेदं स्त्रीपुरुषनपुंसकं जीवं तं मृतकं श्चैव स्वदेशानि विदेशकं ४५ आलिंगि
ते च संयुक्तं द्विपदं पुरुषास्थितं असंयुक्तं च धमे च स्त्रियं चैव विशेषतः ४६ अभिहता यदा प्रश्नं दग्धा चैव वि
शेषकाः नृदानपुंसकं ज्ञेयं त्रयो भेदा उदाहृताः ४७ उत्तरा तु यदा प्रश्नं स्वरं चैवोत्तरोत्तराः तदा जीवं विनिर्दिष्टं
शेषं मृत्युर्न संशयः ४८ जीवता अधरा जीवा मृतकै मृतका भवेत् संयुक्ताश्च यदा प्रश्न स्वदेशं नात्र संशयः ४९
असंयुक्ते विदेशं तु अधराधरतथैव च त्रिहतं प्रश्नवर्णाश्च मात्रा चैव चतुर्गुणा ५० एकत्रानुकृता राशिस्त्रिभिर्भा
गं समाहरेत् प्रथमेन भवेत्पुरुषो द्वितीयेन तु स्त्रियो भवेत् ५१ यदा शून्यं प्रदिष्टं च तदा षंढं विनिर्दिशेत् प्र
श्नाक्षराणि सर्वाणि उत्तराण्यधराणि च तानि सर्वाणि संस्थाप्य निपातनीया परस्परैः यत्किंचित्तिष्ठते शेषं अ

चं॰उ॰
८ 16

8

कोहतस्वरोपेतं त्रिभिरेवहरेद्भागं पुरुषस्त्रीनपुंसकं त्रिभिर्भागेनयल्लब्धं तद्द्विगुणंपरिकीर्तितं समेषुचभवेन्मृत्युर्वि

षमेजीवनसंशयः स्वरराशिहतत्रिंशत्संख्याहार्याविशेषतः विषमंचस्वदेशंचविदेशंचसमंभवेत् प्रश्नसंख्याहताराशी

द्विगुणंस्वरसंयुता विषमेषुभवेत्क्षेमंशेषमृत्युर्नसंशयः तिथिसंख्याहताराशिपातनीयाधराधरैः सप्तभागंक्रि

भेदधाद्विषमेचस्वदेशकं कुब्जांधास्तथाचिपटाषल्वाटावक्रकोशकाः बधिरावाक्यहीनाश्च ह्रस्वदीर्घस्वरास्थि

ताः एतेतेस्वरवर्णंचनामविज्ञायतेस्थिताः तेसर्वेकथितंपूर्वंस्वरवर्णेश्चलक्षयेत् इतिमनुष्ययोनिः पक्षिणांतु

द्वयोःभेदाजलजाःस्थलजास्तथा उत्तरंचेश्वरंचैवपक्षिणांस्थलजास्थितं अधरस्यजलंज्ञेयंद्विधाभेदमुदाहृतं

२५ दग्धप्रश्नंयदादृष्टाहृदश्यतेदग्धस्वरं तदानुबंधनंज्ञेयंस्वरंदीर्घंप्रमुच्यते द्विगुणंचक्रतामात्रांश्चनराणिहतानिच

विषमेषुस्थलंज्ञेयंजलंशून्येनसंशयः स्वरराशिहताश्चैवैर्ह्रतस्वराणिपातयेत् विषमस्यभवेन्मुक्तेसमेवंधनसं

शयः इतिपक्षिणांभेदः नरकाश्चद्विधाप्रोक्ताकर्मजायोनिजास्तथा द्वयोश्चैवद्विधाभेदमस्पातालवासिनः द्विव

र्गेश्चचतुष्कंचकर्मजाचविनिर्दिशेत् अपरेयोनिजाज्ञेयादेवंवर्गचतुष्ककं उत्तराश्च्युस्थितोमर्त्यअधरास्थलवासि

नः इदंभावप्रदिष्टंचलक्षयेन्नारकाद्विधा द्विगुणंचक्रतावर्णात्रिगुणंस्वरसंयुताः विषमेकर्मजाज्ञेयायोनिजा

समएवच एकादशाहताराशौसप्तभागंप्रदापयेत् विषमेषुभवेन्मर्त्यःसमेपातालवासिनः इतिनारकानांभेदः च

8A

17

तुष्पदाः चतुर्विधा क्रूरीनखीतथा दंती शृंगिणस्तु चतुर्थकः वयरवुरी च विकेंज्ञेया नखनस्तु पमेवच फदंतीश्च
तरः शृंगिणि नखमेवच मध्यमाश्च त्रयो मात्रा खुरीणां च प्रकल्पयेत् अन्ये त्रीणि नखीश्चैव एरो ऊ दंतिनः स्मृताः
अंतिमाश्चैव येशेषा खराः शृंगीनियोजयेत् आदौ प्रश्नस्य स्थितो वर्गः अक्षराणि हतानि च मात्रा द्विगुणसंयुक्ता हृ
तंभागं चतुष्कं क्रूरीणामेक दृष्टेन नखीनां च द्वितीयके तृतीये दंतिनां ज्ञेये चतुर्थे शृंगिणां भवेत् पूर्ववर्गे स्थि
ता मात्रा तेन तस्य निहंति च एकत्रानुकृतो राशि र्भागं दद्या यथाक्रमं अश्वश्चैव क्रूरीणां च किंकिणीनां द्वितीय
कः एवं च क्रूरिणां ज्ञेयो वर्गं विज्ञानिलक्षयेत् चित्रको व्याघ्र सिंहश्च मार्जारो मर्कटादयः स्त्री श्वानं तु काश्चैव
अन्ये येन रविनस्तथा गजेंद्र शूकराश्चैव ऋक्षानश्चैव तृतीयकः एते च दंतिना ज्ञेयो ज्ञातव्यं तु प्रयत्नतः वृषभो गंडक
श्चैव महिषमेष संवरं अन्ये येमलके शृंगाः शृंगिणाभि प्रकीर्तिताः चतुष्पदानां द्विभेदा ग्रामारण्यानिवासिनः
जीवं नाम तकाश्चैव द्वयोभेदमुदाहृताः उत्तरस्य स्थिता राशौ ग्रामवासी प्रकल्पयेत् अधरश्चयदा प्रश्ने वेद पुरुष
स्तदाहृता विषमेषु भवेद्ग्राम समेश्चारण्यवासिनः दलितं च कृता प्रश्नपं च लब्धानिपातयेत् त्रिभिर्भागं प्रदातव्यं विष
मे जीवितं ध्रुवं इति चतुष्पदानां भेदः अपदानां प्रवक्ष्यामि स्थलं वा जलजस्तथा निर्विषं सविषं चैव द्वयोभेदमुदाह
तं पंचवर्ग स्थिता पंच स्थलजीवा विनिर्दिशेत् अधस्थाने च तृष्ठे तु जलाश्रया प्रकीर्तिताः प्रथमवर्णाहतं सप्त

९

वं॰उ॰ ९ 18

शेषमध्येनुपातयेत् विषमस्य स्थलं ज्ञेयं जलं वासमेव च निर्विषं लघुमात्रा च सविषं दीर्घ उच्यते एवं भेद
स्तु विज्ञेयं वर्णमात्रानुकल्पयेत् पूर्वराशिहता षष्ठिसप्तलब्धा निपातयेत् निर्विषं विषमं ज्ञेयं समेन सविषं तथा
अलमर्द्धं धनकम हि लोष्टं गिणस्तथा वक्रीतु रुद्रमाला च तृतीयमंडलं चित्रिणी तु फूत्कारी च किंकिणी
तु विषंभरा एते तु निर्विषा प्रोक्ता ज्ञातव्यं तु विशेषतः व्यंतराः कृष्णसर्पाश्च राजसर्पाश्च घोणसाः गंडकूं धा
था कुलथा विषपुंजा तुलनयेत् अनंतकुलको ज्ञेयो वासुकिः शंखपालयोः तक्षकश्च महापद्मः कर्कोटो
पद्म उच्यते एतेषु अष्टनागाश्च पाताले स्वर्गमर्त्ययोः कल्पिता च त्रयो भेदो नागास्तत्र उदाहृताः स्वर्गादरे
स्तथा स्वर्गमर्त्ये मर्त्ये प्रजापते अन्ये तु अनंताय च पाताले च व्यवस्थिताः अष्टवर्णहता षष्टिर्वर्णस्वरहता
नि च एकत्रानुकृता राशि अष्टभागं समाहरेत् अनंतमेकदृष्टेन कुलिकं च द्वितीयके तृतीये वासुकिर्ज्ञेयं चतुर्थे
शंखपालयः पंचमेन स्थितो तक्षं महापद्मं च षष्ठके कर्कोटसप्तमं ज्ञेयं अन्ये पद्मस्तु उच्यते अष्टभागयदा
प्रश्नवर्णसंख्याहतानि च स्वरानुपातयेत्तत्र त्रिभिर्भागं समाहरेत् एकदृष्टो स्थितो वर्गे पृथिव्यां च द्वितीयके
यदा शून्यं प्रदिष्टं च पाताले नात्र संशयः जले दृष्टे द्वयो भेदा उभयोगतिजीविनः अन्ये तु जलमार्गेण जलेस
र्वे वसंति च तपवर्गा चतुष्कं तु घरणं च दशा दराः उभयोगति विज्ञेया ज्ञातव्या चक्रमध्यतः प्रश्नवर्गहताः

९

19 9A

सप्तवर्णानुक्रमसंयुता विषमेषु द्वयोमार्गा जलवासी समेषु च जलहस्तं च कूर्मं च मकरं दर्दुरं तथा मानुषं जल
विज्ञेयं द्वयो योनिं विनिर्दिशेत् जलौकाडुंडुभाश्चैव मत्स्यकजलसूकयो: अन्येजलाः स्थितायेच जलमार्गे प्रकी
र्त्तिता: इत्यपदानां भेद: बहुपादं प्रवक्ष्यामि वर्णाश्चैव चतुर्गुणा: विषमे अंडजास्तेया समेस्वेद विनिर्दिशेत् अभिः
घाभिस्तु हता मात्रा तत्र प्रश्नानुसंयुता सप्तभिस्तु हरेद्भागं अंडजा विषमे स्थितं खर्जूराकीटकाश्चैव पतंगाभ्रमर
मक्षिका कुलीरं च तुला ज्ञेया एते अंडज उच्यते जूकामत्कुणकाश्चैव कीटका अयवासिन: एते षट्कथिता सर्वे स्वे
दजाश्च यथा स्थिता इति जीवयोनिसमाप्त: अत:परं प्रवक्ष्यामि धातुयोनि यथा स्थितं धाम्याधाम्य द्वयोर्भेदाव
र्णस्वरमुदाहृता धातोश्चतुरायेच अधाम्यं समवर्गयो: विषमे च भवेधाम्यं मात्राभेदेन लक्षयेत् आलिंगि
ते च संयुक्ते धाम्य धाम्यस्तु कथ्यते अभिधूमितेतथा धूमे अधाम्यं च विनिर्दिशेत् अयं श्लोकः हृयं रहितप्रश्नानुक्रमे
संयुता: विषमेषु भवेद्धाम्यं अधाम्यं च समेषु च समेषु च पदा हृष्ट द्वयो भेदा उदाहृता: घटितं प्रथमो भेद: द्वितीयम
घटितं परं अवर्गे रजतं ताम्रं कांसं वंगं तु सीसकं रीरिका लोह विज्ञेया अष्टौ लोहा प्रकीर्त्तिता: अवर्गे तु भवेद्धेमकव
र्गे रजतं स्थितं चवर्गे ताम्र विज्ञेयं टवर्गे कांस्यमेव च तवर्गे तु भवेद्वंगं पवर्गे सीसकं स्मृतं यवर्गे रीरिका चैव शव
र्गे लोह उच्यते एवं अष्टविधा वर्गा क्रमादेतानि लक्षयेत् धातुवर्णस्य दिप्रतु निहतं अक्षरस्वरै: अष्टभिस्तु

वं॰ ३॰
१०

10

हेरम्भांगमोबंधातुं विनिर्दिशेत् सुवर्णं रूक्मताम्रं कांसं वंगं तु सीसकं रीतिका लोहविख्याताः अष्टौ लोहाः क्रमेण च ॥ अप्रत्या
ह्वैव हताः सप्त अर्धमात्रा हतानि च एकत्रानुकृताः सर्वे अष्टभागं समाहरेत् अष्टलोहद्विधाभेदः स्थूलं वा घटितं परं घटि
ता बहुभेदाः स्युः अष्टलोहमनेकधा स्थूलं कटपसावर्गे प्रचतया घटितं परं अधरं स्थूलविज्ञेयं घटितं चोत्तरोत्तरैः
स्वरान्तरकृतं दीर्घं अष्टौ सप्तानि उच्यते प्रथमवर्णं दीपेन्त्रत्र विषमे घटितं शुभं सर्वराशिहताः पञ्च मात्रापद्विगुणीकृता
सप्तभागं हरेत्तत्र विषमे घटितं परं धाम्यधातुस्त्रिधाभेदं मुद्राभाजनभूषणं अधराधरे भवेन्मुद्रा अधरे भांडानि क
ल्पयेत् उत्तराच्च यदा दृष्टा प्रश्ने गौरं नात्र संशयः अभिघातं च दग्धं च मुद्रा चैव प्रकीर्तिता असंयुक्ते तथा धूमे भांडं
चैव विनिर्दिशेत् आलिंगिता यदा प्रश्ने अथवा स्वांशापन्नयोः आभरणं विजानीयात् पूर्वं चिह्नानि लक्षयेत् वर्ग
राशिहता वर्णं दलितं च स्वरैर्युता त्रिभिर्भागं प्रदातव्यं शेषं दृष्ट्वैव देहःत्ततः एकेनाभरणं ज्ञेयं पात्रं चैव द्वितीयके प
दप्रश्ने प्रदिष्टं तु मुद्रा चैव तु लक्षयेत् द्विगुणं अक्षराज्ञेया मात्रा चैव हतानि च मूलराशेस्तु संयोज्य भागं दद्यात् यथा
क्रमं देशादेशान्तरश्चैव यथा मुद्रा प्रवर्तते तापते नाम चक्रेण नामबंधेन लक्षयेत् आभरणं षड्विधं प्रोक्तं षड्भिः स्था
ने प्रकल्पयेत् शिरसं श्रवणे चैव बाहुभ्यां कंठमेव च कटिश्चैव तु या प्रोक्ता पादयुग्मं तु लक्षयेत् ततश्चैव द्विधा
भेदं स्त्रीपुरुषनपुंसकं अग्रा चैव शिरः प्रोक्तं इ ई श्रवणयुग्मयोः उ ऊ बाहुस्तथा प्रोक्ता ए ऐ कंठ तथैव च ॥

20

॥ भूषणं

10A

21

जोड़ो कटिर्विजानीयात् अंसः — पादयुग्मयोः समान्तरा वामभागे दक्षिणं विषमान्तरे। पञ्चवर्णहता त्रिंशन्मूलराशी
स्वरैर्युता बाहू — स्थूलहृदि नाभिगंभीरं चैवांगभूषणं एकेन शिरस्तश्चैव अश्वर्णेन्वद्वितीयके ततीये बाहुदेशान् कंठं चैव चतु
र्थके पंचमे कटिदेशं च पादयुग्मं तु षष्ठके लब्धांकं च युता अष्टौ मात्रावर्णेनु पातयेत् विषमं दक्षिणं ज्ञेयं समे वामं प्रकृ
र्तते शिरदेशे तथा मुकुटं कर्णे कुंडलं कंठे च बाहुभ्यां कंकणं चैव चूडकं कंकटकमुद्रिकाः अंसे खला कटि गुजा तु नूपुरं चै
व पादयोः आभरणानि विजानीयान्नामवंध्येन लक्षयेत् देवदैत्याः स्त्रियः पुंस्त्वनरपक्षि चतुष्पदाः प्रथमे च मया प्रोक्ता
स्तत्रभावेन लक्षयेत् चारुकं ताम्रमालकं भाजनं मसिभाजनं निरक्तं तु छिकं ज्ञेयं लेखन्यादेव आसनं घटं तु जिनघं
टा च थालकं चोलसीपिका दर्पणं देवमूर्तिश्चक्रांशं बहुविधं भवेत् द्विधा लोहं च ज्ञातव्यं उत्तरोत्तरमंतथा अधरे अधरं चै
व स्वरवर्णैन्व लक्षयेत् उत्तराश्चाधराश्चैव हतं मात्रानुसंयुता विषमे उत्तमं चैव अधमं समे मेव च उत्तमाने करूपाणि
खड्ग खड्गरिकास्तथा पट्टसं कुंतनाराजं अपुधावहवस्तथा इतिघटितलोहानांभेदः अघटिताश्चैव ये लोहा ते चैवा
ष्टविधास्मृताः सुवर्णादिस्ततो ज्ञाला स्थूलं वा घटितं भवेत् इत्यष्टौ लोहानां भेदा अथ धाम्य प्रवक्ष्यामि उत्तमाम
धमास्तथा उत्तरे उत्तमं चैव अधरे मध्यमास्मृताः पंचमातु यदा दृष्टा वाधावाभियातिताः अधराश्च ततो ज्ञेया मात्रा

चं॰ उ॰
॥
22
ध॰

भाकेन लक्षयेत् वर्णराशिहता प्रश्नमात्रा सर्वानुसंयुता त्रिभिश्चैव हरेद्भागं शेषं चैव विनिर्दिशेत् एकेन उत्तमं चैव
द्वितीय मध्यमास्मृताः अन्ये तु अधमं चैव अंकं चैव प्रकल्पयेत् घटितं अघटितं चैव सर्वभावि न लक्षयेत् उत्तरैर्घटि
तं ज्ञेयं अघटितं अधरेषु च उत्तमं श्रेष्ठपाषाणं अधमं लधमं तथा उत्तमं पद्मरागं च हीरं मरकतमेव च स्फटिकाम
णि वैडूर्यं राजवर्तं तु शंखकं एतानि उत्तमा तेषां नाम वंधेतु लक्षयेत् मध्यमं चैव पाषाणं तालकं चैव गंधकं अभ्रकं
खटिकाश्चैव गैरिका च तथैव च अधमा मृत्तिका लवणं वालुका उष्टिकास्तथा उत्तमं द्विविधं ज्ञेयं पाषाणं जीविकादयः
पाषाणं पद्मरागादि ये च रत्नं प्रकीर्त्तिता माणिक्यं मौक्तिकं चैव मणि शुक्तिकपर्दिका एते तु जीवसंपन्ना जीविकादिश्च
लक्षयेत् वर्णराशिस्वरैर्निहता सर्वराशिसमन्विता सप्तभिस्तु हरेद्भागं विषमे घटितं शुभं अन्ये सर्वाणि ये कोचित् उ
त्तमं मध्यमानि तत् ते सर्वे नाम चक्रेण धातुस्तस्या प्रकल्पयेत् इति अधाम्य धातुयोनि समाप्तं मूले दृष्टे द्विधा भेदं
छेदितं वा अछेदितं अधरे छेदितं प्रश्ने उत्तरे नास्ति छेदितं प्रश्नो कानि समाध्य तस्मात् लवर्णैर्निहतं तिच द्वाभ्यामाहरेद्भा
गं अन्ये छेदं न संशयः पंचभेदा पुनश्चैव फलं पत्रं सपुष्पकं त्वचा मूलं च विज्ञेयं इदं भेदं प्रदाहत चतुराशीहतं तिर्थमध्ये
प्रश्नानि विन्यसेत् पंचभिस्तु हरेद्भागं शेषं मूलं वदेत्ततः एकफलं द्विके पुष्पं त्रि त्वचा च तु वीजपो: अन्ये पत्रसमा तेया

॥

23 ज्ञातव्याडुक्रमंक्रमात् उन्नरेतुस्वरेशेतुअधरेभुविदेशकौ उन्नरेभुभवेदार्द्रं अधरेशुष्कमेवच उन्नराचसुगंधाच
दुर्गंधाचधराह्वराः उन्नरस्वरसंवोधं प्रवोधं त्वधरस्वरे। तत्रपंचविधोभेदः पंचभिर्भागमाहरेत् वृक्षगुल्मतथाव
लीकंदंचैवतुपंचमं पंचमाचयदादृष्टादग्धंचैवानुनासिका तदात्रिगुणमारव्यातंकाष्ठंचैवतुनिर्गुणं त्रिगुणरूकृता
प्रसमूलंदित्रिसंसमुद्भूतं षड्भिल्हरेद्भागंशेषंचैवप्रकल्पयेत् कटुतिक्तकषायंचक्षारंचैवाम्लमेवच मधुरंतुतथा
ज्ञेयंरसाश्चषड्विधाः स्मृताः एकेनभवेत्कटुकंतिक्तंचैवद्वितीयके तृतीयेतुकषायंच अाम्लंचैवचतुर्थके पंचमा
तुयदादृष्टाअस्वादंलवणंपरं षष्ठेतुमधुरंज्ञेयंषड्भावानिचलक्षयेत् स्वर्गमर्त्यंचपातालंअधरंस्वरकल्पि
तं गोमय्यादतिमलेषुसर्वेधातुसमाश्रिताः इतिमूलयोनिविवरणं जीवधातुमूलज्ञानेदशमंप्रकरणम् १०
वस्तुसंख्याप्रवक्ष्यामिचिंताल्कचमष्टिभिः अअाइईस्थितंएकंउऊपंचमसप्तयोः एऐद्वयंचतुर्थंस्यात् ओ
औषष्ठंतथैवच अंतिगाभ्रयदादृष्टात्रिपंचमविनिर्दिशेत् अंतरस्यकृताराशिपातनीयाधराणिच प्रसमात्रा
८= हृतात्तत्रसप्तभागंप्रदापयेत् शेषांकंबोद्धरितंयस्तुवस्तुसंख्याविधीयते आलिंगितेदवभमेजलाश्रयंतुधू
मिते दग्धमस्त्रयदादृष्टाकथ्यतेचाग्निसंश्रयं द्विगुणमस्त्रवर्णंचवर्णसंख्याहतानिच तस्यमात्रातुसंयोज्या

नृ॰ पं॰ १२ 12

24

त्रिभिर्भागं समाहरेत् देवाग्रे चैकदृष्टेन जलाग्रं द्वितीयके अन्येन अग्निसंज्ञे पंल्काभेदत्रयं स्थितं अभिघाते दग्ध
दृष्टे मृष्टिं वै धंतु समाभिः असंयुक्ते तु षष्ठं तु अभिहते तु पंचकं अभिहते च तत् संख्या संयुक्ते च ततीयकं धूमिते च द्वितीयं चाए
कंआलिंगिते शुभं स्वरातु मष्ट सग स्यात्रिभिभागं समाहरेत् सप्तभिस्तु हरेद्भागं मुष्टिसंख्या परं भवेत् अथवा अष्ट
भावेन भागं दद्यात् समाभिः शानिनाकस्त्र संदेहो मुष्टिसंख्या विधीयते इति चूडामणिसारे चंद्रोन्मीलने महाशास्त्रा
र्णवाद्विनिर्गते चिंतालूकमुष्टिवस्तुसंख्याप्रकरणं दशकं ११ नाम्नबंधं प्रवक्ष्यामि अक्षराणि स्वराणि च उत्तरा
चयदा अस्य समेषु विषमं स्मृतं विषमेषु समं नाम दृश्यते च न संशयः समेषु विषमं नाम विषमस्य समे पुनः २
मिश्रिता चयदा अस्य उत्तराणि अधराणि च विषमस्य समं नाम निभ्रांतं चैव लक्षयेत् ३ अक्षरं च द्वयं चैव संयुक्ते तु वि
निर्दिशेत् असंयुक्ते त्रयं दृष्ट्वा चत्वारोभिहतं परं ४ पंचकं तामिघाते च अभिहते षष्ठमास्थितं पंचभेदपदा दृष्टा
लदा सप्त न संशयः ५ अक्षराचयदा दृष्टा सर्वे आलिंगिता शुभाः त्रिपंचमास्थितो नाम अभिधूमे च तुर्थकं ६ द्विच
तुर्थं भवेद्दग्धं त्रिवर्गमेकमक्षरं अवृतया समेनाम शेषं च विषमं परं ७ नेत्र २ वह्नि ३ स्वर ७ अष्ट ८ रू ५ षयो वेद ४ वं
द्रमाः १ अंगं ६ उद्धृतादि प्रशेषं वर्गहनंति च ८ एकत्रानु कृतो राशि सप्तभागं प्रदापयेत् यच्छेषं तिष्ठति किंचित्
वर्णसंख्या च तां विदुः ९ वर्णसंख्या कृता मंत्र उत्तराणि अधराणि च युक्तानि वर्णमात्राणि भागं दद्याद्यथाक्रमं १०

12A

25

अष्टविंशति वर्णानि स्वराणि व्यसनेनच एषमात्रा समायुक्ता नामबंधं न संशयः ११ उन्नतानम दृष्टाच दग्धाचस्व
रमेवच नामवंधं प्रवक्ष्यामि अन्नराणि स्वराणि च १२ उन्नताचपदा प्रसु समेषु विषमेस्मृतं विषमेषु समेनामा दृश्य
ते च न संशयः १३ समेषु विषमं नाम विषमेषु समं पुनः मिश्रिताचपदाप्रश्न उन्नतराण्यधराणि च १४ विषमस्य समं
नाम निर्भ्रांतेचैव लक्षयेत् अन्तरं तु द्वयं चैव संयुक्ते तु विनिर्दिशेत् १५ असंयुक्तोचतत्र यं दृष्टा च त्वारो मिहितं परं ए
षमात्रा विनिर्मुक्तो नामबंधं यथाक्रमं स्वरहीना यदा दृष्टा उन्नताच विशेषतः तदा तु सर्ववर्णाश्च आरूढ्य स्वरदृ
श्यते १७ अथ रवर्णस्वरादीर्घयदाशावं प्रदृश्यते उदात्तश्चावर्णमंत्यं निजस्वरसंयुतं १८ उन्नताच यदा प्रश्न मा
त्राचैवोन्नतोन्नताः तदा तु वर्णरूपेण नामबंधं स्वरं युतं अइउऋ उ स्वराः पंच चत्वारो आ ई ए स्वरत्रयं दृष्टा उ ऊ ऋ उ ऊ
स्वरद्वयं २० संयुक्ते स्वरदीर्घं च यदा दृष्टा मेकमात्रानुमध्यमं विलोमेच यदा दृष्ट्वा प्रसक्ति नास्ति प्रदृश्यते २१
आलिंगितेतथा धूमे दग्धमात्रा यदा भवेत् तदा तस्य त्रयो भावा एकीकृत्वा न संशयः २२ वर्णास्तस्मात् पुनर्योज्या
पातनीयाधराधिच इंद्रियाणां हरेद्भागं शेषमात्रा निदृश्यते २३ प्रसमात्राहता रर्वाह्नि पंक्षर्णाय यथाक्रमं भा
गं दद्याद्विशेषेण शेषमात्रा न संशयः २४ इति नामाक्षर स्वरप्रमाणसंख्या अथातः संप्रवक्ष्यामि नामचक्रं

13

के०उ०
१२ 26

यथाग्स्थितं त्रैलोक्यंदृश्यतेयेनात्रिदशैरपिदुर्लभं २५ ज्ञायंतेयेनत्रैलोक्यंआब्रह्मभुवनांतकं संयुक्ताचयदाप्रश्नप्रथमेवर्गवर्णकं २६ अभिघातेद्वितीयस्यतृतीयमालिंगितंपरं अभिधूमेचतुर्थंतुदग्धेतुपंचमंस्मृतं षष्ठाभिद्युत्स्वरसंयुक्ते अभिघातस्तुउच्यते अष्टमेतुभवेद्वर्गाः अभिहिताश्चयदाभवेत् २८ एवंचत्वष्टभावानिलक्षयेच्चप्रयत्नतः प्रथमेस्वांशवर्गंतुद्वितीयेनतृतीयकं २९ तृतीयेतुत्रयंदृष्ट्वाचतुर्थेनचतुर्थकं पंचमेपंचमंज्ञेयंषष्ठेचैवतुषष्ठकं ३० सप्तमेतुभवेत्सप्तअष्टमेचाष्टमंशुभं आरब्धेतेमध्येसंयोगंगुरुरक्षरैः ३१ तदासौवर्गविशेषमात्राकार्याविचारणात् प्रथमेवर्णप्रश्नस्यप्रथमंस्वरसंस्थितं ३२ तृतीयस्यस्थितंवर्गेप्रथमवापंचमोच्यते उत्तराश्चयदाप्रश्नअधरंचस्वरभवेत् ३३ तदातुस्वांशवर्गंतुचाष्टमंदृश्यतेध्रुवं अधरंतुयदाशंकुउत्तरस्वरसंस्थितं ३४ सप्तमंतुभवेद्वर्गंपंचमंतुस्फुटंभवेत् मिश्रिताचयदादृश्यास्वरवर्णाधरोत्तरा ३५ ज्ञातव्यंषष्ठकंवर्गंद्वितीयोनात्रसंशयः एदृष्टेद्वयोर्वर्णाअन्यभेदंस्वरसंस्थितं ३६ तदातुस्वांशवर्गंतुसप्तमंतुविजानतः अवर्गस्यतवर्गंतुयदाप्रश्नेविनिर्दिशेत् ३७ तदाचत्वष्टमेवर्गेअक्षरंनात्रसंशयः ककारस्यपकारंतुद्वयोःवर्गापतंतिच ३८ सप्तमंतुभवेद्वर्गंलक्षयेच्चप्रयत्नतः मिश्रिताचयदावर्गाचकारस्ययकारकं ३९ षष्ठकंज्ञायतेतत्रभ्रांतिहीनंतुल

१२

13A

27 चतुर्थमष्टमं वर्गं शब्दमध्ये यदा भवेत् ४० तदा तु सप्तमं वर्गं ज्ञातव्यं तु विशेषतः तत्वर्गे यदा दृष्टा चतुर्थो भांति हीन
यः ४१ पकारं तु चकारस्य तृतीयो नात्र संशयः आद्य मं तस्य वर्गस्य यदा प्रश्ने प्रदृश्यते ४२ तदा तु प्रथमं ज्ञेयं ना
त्र कार्या विचारणा इति चंद्रोन्मीलने वर्गानयनभावं द्वादशं प्रकरणं १२ उद्धृतानि शतान्यंच षष्टिमेकाधिका
युते प्रश्नवर्णं क्षिपेत्तत्र वर्गमानं हरंति च ४३ अष्टभिस्तु हरेद्भागं शेषं वर्गं विनिर्दिशेत् अथवा प्रथमेव
र्गे हतं क्षिप्तं स्वरंयुतं अष्टाभिस्तु हरेद्भागं शेषं वर्गं विनिर्दिशेत् ४४ स्वरानुपातये द्वर्गा वर्णं क्षिप्तं हतानि च
भागं तु अष्टभिर्दद्यात् शेषं वर्गं प्रकल्पयेत् ४५ अधराणि पातयेत् क्षिप्तं उत्तरस्य हतं पुनः पूर्वकैस्तु हरेद्भागं
शेषा वर्गा न संशयः ४६ गुणितं च स्वरैर्द्वीकं वर्णराशिस्तु पातयेत् भागं तु जायते तत्र निर्भ्रांतं वर्गसंभवं ४७
षड्विंशाङ्कस्थितं चांकं पातनीयाधराधरे शेषेण निहितं क्षिप्तं भागं दद्यात् क्रमेण तु ४८ दलितं चोत्तरा प्रश्नं सं
युक्तं चोनुसंयुतं गुणितं तु स्वरैस्तत्र भागं दद्याद्यथाक्रमं ४९ अष्टादारय दा प्रश्नं संयुक्तं षड्विंशायोः समेरू
पं प्रदातव्यं विषमे हीनं न संशयः ५० प्रश्नमात्राहता क्षिप्तं पातनीयाधराणि च उत्तराणि तु संयोज्या शेषं वर्ग
स्य निर्णयं ५१ उत्तराश्चाधराश्चैव सर्वे वर्णा यथाक्रमं एकत्रानुकृतो राशिरष्ट भागं समाहरेत् ५२ प्रश्नमा

त्राहता वर्णशब्दसंख्या प्रदापयेत् अष्टाभिस्तु हरेद्भागं शेषं वर्गानु दृश्यते ५३ ह्रस्वमात्रास्थिता वर्णाः क्रमेणैवं यथा
विधिः उत्क्रमेतु पुनर्दीर्घं भागं दद्यात्तु लक्षयेत् ५४ एवं तया यदा प्रश्ने उन्नरस्वरसंस्थितं तदा तु गुणयेत्तत्र सर्वभागं समा
चरेत् ५५ उन्नरस्याधरं चैव समाहितं पदा भवेत् तदा तु सप्तभिर्गुण्या त्रिभिर्दद्यात्तु हरंतिच ५६ दीर्घमात्रा च वर्णा
न तस्यानिहंतिच वर्णसंख्या हरेद्भागं शेषा वर्गानुच्यते ५७ उन्नरास्त्वाधरास्त्वैव निहतं च परस्परैः एक
त्रानुकृतो राशिर्भागं दद्याद्यथाक्रमं ५८ आलिंगिता यदा वर्गा मध्ये शब्दं प्रजायते एषा मात्राकृताः सर्वत
दा वर्गस्फुटं भवेत् ५९ नाम वर्णस्य वर्गान्तु स्वं चैव चतुर्थकं एषु शब्देषु संयुक्तं भागं दद्याद्यथा विधिः ६०
यस्य वर्णास्थितामात्रा तेन तस्य निहंतिच एकत्रानुकृता सर्वा त्रिगुणस्य विभाजितं ६१ यस्य वर्गास्थिता व
र्णाहताः सर्वक्रमेण तु एकत्रानुकृतो राशिर्वर्णसंख्यानुसंयुतं ६२ सर्वराशि स्वरैर्मिश्रं द्विगुणं सप्तसंयुता
क्रमे भागं हरेच्चैव शेषं वर्गानुदृश्यते ६३ प्रथमे द्विगुणं चैव त्रिगुणं च द्वितीयके चतुर्गुणं तृतीयं तु तुर्यं पं
चगुणं तथा ६४ पंचमं चैव वर्गान्तु हतं चैव तु सप्तभिः अष्टभागप्रदातव्यं शेषं वर्गं विनिर्दिशेत् ६५ अवर्गादि
समुद्भूत्य चतुर्थादि यथाक्रमे जायते वर्गसंख्या तु चक्रे गजकिलोलितं ६६ एषा संख्या कृता प्रश्न त्रिगुणं ह

पसंयुता क्रमेणैव हरेद्भागं शेषं वर्गं विनिर्दिशेत् ६७ अथ वर्गादिः अकचटतपयश वर्गाः अ४ आ५
इ६ ई७ उ८ ऊ९ ए१० ऐ११ ओ१२ औ१३ अं१४ अः१५ क५ ख६ ग७ घ८ ङ९ च६ छ७ ज८ झ९ ञ१० ट७
ठ८ ड९ ढ१० ण११ त८ थ९ द१० ध११ न१२ प९ फ१० ब११ भ१२ म१३ य१० र११ ल१२ व१३ श११ ष१२ स१३
ह१४ गजविलोलितं चक्रम् द्वितीया द्विगुणा प्रोक्ता चतुर्थी तु चतुर्गुणाः एकत्रानुकृताः सर्वे दैत्यचक्रं स
मुद्धृतं ६८ पुनः राशिहृताः पंचमिश्रितानुचसंख्यया क्रमेणाष्टहार्जितं तत्र शेषं वर्गं विनिर्दिशेत् ६९
आ२ ऐ४ ख६ छ८ ठ१० थ१२ फ१४ र१६ ष१८ ई४ ओ८ घ१२ ज१६ ढ२० ध२४ भ२८ व३२ ह३६ दै
त्यचक्रं ७० नवाक्षराः पंचवर्गात् क्रमेसंख्यासमुद्धृतं वर्गमानेन संगृह्य गणाच्चक्रं विनिर्दिशेत् ७० ह
तं च सप्तभिः द्विप्रचरस्युक्तं चैव कारयेत् भागेनष्टाहार्जितं तत्र शेषं वर्गं विनिर्दिशेत् ७१ अ१ ए२ क३ च४
ट५ त६ प७ य८ श९ आ२ ऐ३ ख४ छ५ ठ६ थ७ फ८ र९ ष१० इ३ ओ४ ग५ ज६ ड७ द८ ब९ ल१० स११
ई४ औ५ घ६ झ७ ढ८ ध९ भ१० व११ ह१२ उ५ ऊ६ अं७ अः८ ङ९ ञ१० ण११ न१२ म१३ विहितं प्रश्नेग
णचक्रं द्विधा तु वर्गसंख्यानु पंचवर्गाः स्वरैर्हता एकीकृत्वा तदा सर्वे गरुडचक्रस्थितं पदं ७२ नवभिस्तु ह

15

चं०उ०
१५

30

तारा श्रीपुंकाग्रघुभिरेवच पूर्वभागास्थितातत्र वर्गंचैवविनिर्दिशेत ७३ अ१आ२इ३ई४उ५ऊ६ए७ऐ८ओ९
औ१० अं११अः१२ क१ख२ग३घ४ङ५च६छ७ज८झ९ञ१० ट११ठ१२ड१३ढ१४ण१५ त१६थ१७द१८ध१९ न२०
प२१ फ२२ब२३भ२४म२५ य२६र२७ल२८व२९ श३०ष३१स३२ह३३ अभिहितप्रश्नेगरुडचक्रं क्रमेणाग्र-
तरा सर्वे हतंपंचविशेषतः एवंतिप्रंतुदातव्यं चक्रं सिंहावलोकनं ७४ एकादशाहतारा शेषादेशासंख्यायुतंपरं
क्रमेण भागंपुनर्दद्यात शेषंवर्गविनिर्दिशेत ७५ अ१आ२इ३ई४उ५ऊ६ए७ऐ८ओ९औ१० अं११अः१२
क१ख२ग३घ४ङ५ च६छ७ज८झ९ञ१० ट११ठ१२ड१३ढ१४ण१५त१६थ१७द१८ध१९न२० प२१फ२२
ब२३भ२४म२५ य२६र२७ल२८व२९ श३०ष३१स३२ह३३ अभिघातितप्रश्ने सिंहावलोकनंचक्रं ॥
वर्गेवर्गेस्थितामेकं अष्टवर्गेयथाक्रमं एकत्रानुक्रमात् सर्वे नंद्यावर्तस्यनिर्णयं ७६ त्रयोदशाहतंपि-
ण्डयुक्तं चैवतुद्वादशं १२ हरितंचपुनर्भागंलब्धं वर्गंयथाक्रमं ७७ अ१क२च३ट४त५प६य७श८ वर्गाः अ१आ२
इ३ई४उ५ऊ६ए७ऐ८ओ९औ१० अं११अः१२ क१ख२ग३घ४ङ५ च१छ२ज३झ४ञ५ ट१ठ२ड३ढ४ण५
त१थ२द३ध४न५ प१फ२ब३भ४म५ य१र२ल३व४ श१ष२स३ह४ आलिंगितप्रश्नेनंद्यावर्तचक्रं ॥
द्विगुणंचस्थितामात्रावर्गानुक्रमसंख्यया एकत्रानुक्रमात् सर्वे [illegible] चक्रेतुकेवलं ७८ तिथि १५ संख्या

१५

15A

31 हतं पिंडं मध्ये देयं पंचतुर्दशाः १४ अष्टधा हारितं भागं वर्गं चैव स्फुटं भवेत् ७९ अ२ आ४ इ६ ई८ उ१० ऊ१२
ए१४ ऐ१६ ओ१८ औ२० अं२२ अः२४ क१ ख२ ग३ घ४ ङ५ च६ छ७ ज८ झ९ ञ१० ट११ ठ१२ ड१३ ढ१४ ण१५
त१६ थ१७ द१८ ध१९ न२० प२१ फ२२ ब२३ भ२४ म२५ य२६ र२७ ल२८ व२९ श३० ष३१ स३२ ह३३ आमि
धमित प्रश्ने अष्टमो हनचक्रं समाप्तं गृह्यते वर्गसंख्या तु वर्णसंख्या यथाक्रमं एकत्वानुकृतं पिंडं मंडूकच
क्रं विनिर्दिशेत् ८० एकादशाहता राशिं मध्ये षोडश विन्यसेत् क्रमे भागं पुनर्दद्यात् विलोमेन तु लक्षयेत् ८१
अ१ आ२ इ३ ई४ उ५ ऊ६ ए७ ऐ८ ओ९ औ१० अं११ अः१२ क२ ख३ ग४ घ५ ङ६ च३ छ४ ज५ झ६ ञ७ ट४ ठ५
ड६ ढ७ ण८ त५ थ६ द७ ध८ न९ प६ फ७ ब८ भ९ म१० य७ र८ ल९ व१० श८ ष९ स१० ह११ इत्यम
ल्पे मंडूकलुनचक्रं समाप्तं स्वांशापहते गणं चक्रमांडूकेन द्वितीयकं तृतीयं तु भवेद्वर्गं नंद्यावर्तं विशेषतः १
तुर्यमस्त्रविमोहं च पंचमं तु गजाङ्कुशं षड्विस्थाने च षड्वर्गं तार्क्ष्यचक्रं विनिर्दिशेत् २ सिंहावलोकनं सप्तदे
कुयं॥ ल चक्रं तु चाष्टमं अष्टचक्रमयाख्याता वर्गसंख्या विधीयते ३ सप्तवर्गाः समुद्दिष्टा ककारादि यथाक्रमं शा
कारादिस्थितं एकं शेषं चैव क्रमेण तु ४ वर्गवर्गस्य वर्णं तु क्रमे रूपं तु निश्चितं षड्विंशमं तु दातव्यं जानीयाद्वा

16

सं॰ उ॰ दशाक्षराः ५ ततोत्र सम्यक्समालोक्य स्वकसंख्यानुवर्णयेत् एकत्रानुक्तेनोराशिर्हतं बुद्ध्वा नव ९ स्य पर ॥६॥ पर्वतये त=

१६ त्रम्सम धीत अष्ट भागयथा पञ्चेषांतद्वेदर्भे हस्वकं महासर्गवं ६ ककाः ७ किकी ८ कुकू ९ केकै १० कोकौ ११ कंकः १२

32 खखा ८ खिखी ९ खुखू १० खेखै ११ खोखौ १२ खंखः १३ गगा ९ गिगी १० गुगू ११ गेगै १२ गोगौ १३ गंगः १४

घघा १० घिघी ११ घुघू १२ घेघै १३ घोघौ १४ घंघः १५ ङङा ११ ङिङी १२ ङुङू १३ ङेङै १४ ङोङौ १५ ङंङः १६ चचा ६

चिची ७ चुचू ८ चेचै ९ चोचौ १० चंचः ११ छछा ७ छिछी ८ छुछू ९ छेछै १० छोछौ ११ छंछः १२ जजा ८ जिजी ९ जुजू १०

जेजै ११ जोजौ १२ जंजः १३ झझा ९ झिझी १० झुझू ११ झेझै १२ झोझौ १३ झंझः १४ ञञा १० ञिञी ११ ञुञू १२ ञेञै १३

ञोञौ १४ ञंञः १५ टटा ५ टिटी ६ टुटू ७ टेटै ८ टोटौ ९ टंटः १० ठठा ६ ठिठी ७ ठुठू ८ ठेठै ९ ठोठौ १० ठंठः ११

डडा ७ डिडी ८ डुडू ९ डेडै १० डोडौ ११ डंडः १२ ढढा ८ ढिढी ९ ढुढू १० ढेढै ११ ढोढौ १२ ढंढः १३ णणा ९ णिणी १०

णुणू ११ णेणै १२ णोणौ १३ णंणः १४ तता ४ तिती ५ तुतू ६ तेतै ७ तोतौ ८ तंतः ९ थथा ५ थिथी ६ थुथू ७

थेथै ८ थोथौ ९ थंथः १० ददा ६ दिदी ७ दुदू ८ देदै ९ दोदौ १० दंदः ११ धधा ७ धिधी ८ धुधू ९ धेधै १० धो

धौ ११ धंधः १२ नना ८ निनी ९ नुनू १० नेनै ११ नोनौ १२ नंनः १३ पपा ३ पिपी ४ पुपू ५ पेपै ६ पोपौ ७ पंपः ८

16A

33

फफा४ फिफी५ फुफू६ फेफै७ फोफौ८ फंफः९ बबा५ बिबी६ बुबू७ बेबै८ बोबौ९ बंबः१० भभा६ भिभी७ भुभू८
